শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একোনৱিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একোনৱিংশং দশকম্॥

## প্রাচেতসকথানুৱর্ণনম্

পৃথোস্তু নপ্তা পৃথুধর্মকর্মঠঃ
প্রাচীনবর্হির্যুৱতৌ শতদ্রুতৌ।
প্রচেতসো নাম সুচেতসস্সুতা -
নজীজনৎ ৎৱৎকরুণাঙ্কুরানিৱ॥ 19.1 ॥

পিতুঃ সিসৃক্ষানিরতস্য শাসনাৎ
ভৱত্তপস্যাভিরতা দশাপি তে।
পযোনিধিং পশ্চিমমেত্য তত্তটে
সরোৱরং সন্দদৃশুর্মনোহরম্॥ 19.2 ॥

তদা ভৱত্তীর্থমিদং সমাগতো
ভৱো ভৱৎসেৱকদর্শনাদৃতঃ।
প্রকাশমাসাদ্য পুরঃ প্রচেতসাম্
উপাদিশৎ ভক্ততমস্তৱস্তৱম্॥ 19.3 ॥

স্তৱং জপন্তস্তমমী জলান্তরে
ভৱন্তমাসেৱিষতাযুতং সমাঃ।
ভৱৎসুখাস্বাদরসাদমীষ্ৱিযান্
বভূৱ কালো ধ্রুৱৱন্ন শীঘ্রতা॥ 19.4 ॥

তপোভিরেষামতিমাত্রৱর্ধিভিঃ
স যজ্ঞহিংসানিরতোঽপি পাৱিতঃ।

পিতাঽপি তেষাং গৃহযাতনারদ -
    প্রদর্শিতাত্মা ভৱদাত্মতাং যযৌ ॥ **19.5** ॥

কৃপাবলেনৈৱ পুরঃ প্রচেতসাং
    প্রকাশমাগাঃ পতগেন্দ্রৱাহনঃ।
ৱিরাজি চক্রাদিৱরাযুধাংশুভিঃ
    ভুজাভিরষ্টাভিরুদঞ্চিতদ্যুতিঃ ॥ **19.6** ॥

প্রচেতসাং তাৱদযাচতামপি
    ৎৱমেৱ কারুণ্যভরাদ্ৱরানদাঃ।
ভৱদ্ৱিচিন্তাঽপি শিৱায দেহিনাং
    ভৱৎৱসৌ রুদ্রনুতিশ্চ কামদা ॥ **19.7** ॥

অৱাপ্য কান্তাং তনযাং মহীরুহাং
    তযা রমধ্ৱং দশলক্ষৱৎসরীম্।
সুতোঽস্তু দক্ষো ননু তৎক্ষণাচ্চ মাং
    প্রযাস্যথেতি ন্যগদো মুদৈৱ তান্ ॥ **19.8** ॥

ততশ্চ তে ভূতলরোধিনস্তরূন্
    ক্রুধা দহন্তো দ্রুহিণেন ৱারিতাঃ।
দ্রুমৈশ্চ দত্তাং তনযামৱাপ্য তাং
    ৎৱদুক্তকালং সুখিনোঽভিরেমিরে ॥ **19.9** ॥

অৱাপ্য দক্ষং চ সুতং কৃতাধ্ৱরাঃ
    প্রচেতসো নারদলব্ধযা ধিযা।
অৱাপুরানন্দপদং তথাৱিধ -
    স্ত্ৱমীশ ৱাতালযনাথ পাহি মাম্ ॥ **19.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনৱিংশং দশকং সমাপ্তম্ ॥